National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2017; 1(15): 116-118
© 2017 NJHSR
www.sanskritarticle.com

# उणादीनां धातुजत्वं छान्दसपदनिष्पादनसामर्थ्यं च

**बेलापूरकर चारुशीला राजन**

**बेलापूरकर चारुशीला राजन**
शोधच्छात्रा, व्याकरणविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः, आं.प्र.।

**Correspondence:**
**बेलापूरकर चारुशीला राजन**
शोधच्छात्रा, व्याकरणविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः, आं.प्र.।

भुवनमण्डलस्य आद्यं वाङ्मयं वेदवाणी, ताञ्चाधिगन्तुं प्रादुर्भूतमङ्गषट्कं शास्त्रनिकायस्य बीजभूते। वेदाङ्गषट्के च व्याकरणस्य अनन्यसाधारणमङ्गत्वम्। तस्यास्य व्याकरणस्य खिलपाठेषु अन्यतमः पाठः उणादिपाठः। 'उणादीनि अव्युत्पन्नानि प्रातिपदिकानि' इति यद्यपि प्रसिद्धिः तथापि 'व्याकरणे शकटस्य च तोकम्' इत्यनुगुणम् उणादीनां धातुजत्वस्य पुष्टिं करोति महर्षिः स्वामिदयानन्दसरस्वतिः तस्य उणादिवृत्तौ। तत्रैव 'वैदिकलौकिककोषे' इत्येतत्पदनिवेशः उणादीनां छान्दसपदनिष्पादन-सामर्थ्यमपि प्रतिपादयति। तस्यास्य अंशद्वयस्य परामर्शः लेखेऽस्मिन् विस्तरेण स्वीक्रियते।

'वेदैश्च सर्वैरहमेव वेद्यः'[1] इति प्रतिपादयतः श्रीकृष्णस्य वाणी वेदज्ञानमहिम्ना जननमरणविमुक्तेः पन्थानं प्रदर्शयति। विश्वेऽस्मिन् विश्वे प्रवृत्तानि सर्वाण्यपि धर्मशास्त्राणि वेदोक्तां वाणीमेव भूयो गिरन्ति। विद्यमानेष्वपि बहुषु वेदाध्ययनस्य प्रयोजनेषु 'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' गीरियं गरिमा वेदानां सङ्गिरते। वेदानां सम्यगर्थावबोधाय, निर्दुष्टोच्चारणाय गर्भितार्थज्ञानाय च वेदानां संहितारूपनिबद्धत्वात् स्वाध्यायप्रवृत्तेश्च पश्चात् प्रवृत्तानि वेदाङ्गानि। वेदाङ्गज्ञानमन्तरा वेदार्थः सम्यक्तया प्रतिपत्तुं न शक्यः ।

वेदाङ्गेषु च व्याकरणं प्रकृतिः, प्रत्ययः, आगमः, आदेशः इत्यादिभिः शब्दसिद्धिप्रदर्शकम्, शब्दनिष्पत्तिप्रक्रियाबोधकम्। उक्तञ्च पतञ्जलिना व्याकरणाध्येतव्यस्य महत्प्रयोजनं "रक्षायै वेदानाम् अध्येयं व्याकरणम्" इति। "प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः" इति भर्तृहरिणापि प्रथमाङ्गत्वेन अङ्गीकृतम्। यौगिकाः, योगरूढाः रूढाश्च शब्दाः इति शब्दानां त्रिधा विभागः व्याकरणे क्रियते । तेषु यौगिकानां योगरूढानाञ्च शब्दानां निष्पत्तिं व्याकरणशास्त्रं करोति। ये च शब्दाः रूढाः मताः ते सङ्कलिताः सन्ति उणादिपाठेषु। अन्यच्च उणादीनि अव्युत्पन्नानि प्रातिपदिकानि इति उक्तिस्तु प्रसिद्धा एव।

वैयाकरणसम्प्रदाये नैकैः वैदिकलौकिकशब्दाः निष्पादिताः। तथापि नैके शब्दाः तेषां परिधौ न समागताः। तदर्थं च शब्दानामेतेषां धातुप्रत्ययादिज्ञानाय उणादिसूत्राणि प्रणीतानि। व्याकरणशास्त्रे उणादीनां विशिष्टं स्थानं विद्यते। व्याकरणकात्स्न्र्यद्योतनाय प्रयुज्यमानपचाङ्गसंज्ञायाम् उणादिपाठः समाविष्टः वर्तते। उणादिसूत्रैः षट्शताधिकद्विसहस्रस्य शब्दानां साधुत्वं निरूपितम्। अत्र लौकिकाः वैदिकाश्च उभयशब्दाः प्राप्यन्ते। कतिचनवेदभाष्यकारैः अपि स्ववेदभाष्ये उणादिसूत्राणि प्रमाणत्वेन निर्दिष्टानि दृश्यन्ते।

शब्दानुशासनं विरचयता आचार्येण धातुगणोणादिलिङ्गानुशासनाख्याः खिलपाठाः निर्मातव्याः भवन्ति। एवं धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनमिति पञ्चाङ्गव्याकरणमिति व्यवह्रियते। पञ्चपाठीत्यपि अस्य समुदितस्य व्याकरणस्याख्या। पञ्चाङ्गेऽस्मिन् अन्यतमः खिलपाठः उणादिपाठः। अस्यैव उणादिकोशः, उणादिगणः, उणादिनिघण्टुः इत्यादीनि नामानि प्रसिद्धानि। तत्र स्वामिदयानन्दसरस्वतिना हेमचन्द्राचार्येण च उणादिगणः इत्यपि शब्दः प्रयुक्तः वर्तते। वेङ्कटेश्वरनाम्ना वृत्तिकारेण च उणादिनिघण्टुः इति प्रयोगः कृतः वर्तते।

शब्दानां व्युत्पत्तिसम्बन्धिन्यौ द्वे धारणे निरुक्तकारसमयादेव प्रचलतः। तयोरेका सर्वेऽपि शब्दाः धातुजाः, अपरा तु न सर्वेऽपि शब्दाः धातुजाः इति। इमे द्वेऽपि धारणे वैय्याकरणेष्वपि विद्येते। तस्मात् धातुजत्वसिद्धान्तस्य परिपुष्टये एव उणादीनां प्रणयनं सञ्जातमिति वक्तुं शक्यते। येषां शब्दानां स्पष्टतया प्रकृतिप्रत्ययविभागः न प्रतीयते तेषु प्रत्ययस्य ऊहा कृता वर्तते। त एव प्रत्ययाः उणादिषु अन्तर्भवन्ति। उणादीनामेषां सुदीर्घा काचित् परम्परा वर्तते। स्वयं पाणिनिरपि 'उणादयो बहुलम्' इत्यनेन सूत्रेण उणादीन् स्वव्याकरणस्य अनिवार्यमङ्गं मन्यते। शब्दानां यौगिकत्वस्य प्राचीनपक्षस्य रक्षायै एव उणादिपाठः खिलपाठरूपेण पृथक्कृतः। एवं सत्यपि कृदन्तभागात् उणादीनां महत्त्वं कथञ्चिदपि न्यूनं न जायते। परं यथा कृदन्तप्रत्ययानां विषये निश्चितप्रत्ययः निश्चितप्रक्रिया च भवति तथा उणादीनां विषये न दृश्यते। प्रकृतिं दृष्ट्वा प्रत्ययः ऊह्यः भवति, प्रत्ययं दृष्ट्वा च प्रकृतिः ऊह्या भवति। उणादीनां प्रतिपादनाय शब्दानां धातुजाधातुजत्वपक्षविषये विचारणीयं भवति।

भगवता पतञ्जलिना उणादीनां महत्त्वं निदर्शनत्वं च याभिः कारिकाभिः प्रतिपादितं तत्रेदं वचः आयाति यत् 'नैगमरूढिभवं हि सुसाधु' इति। सर्वेषां नैगमानां रूढाणां च शब्दानां साधुत्वपरिज्ञानाय कतिभिश्चिद्धातुभिः उणादीनां विधानं कृतम्। प्रत्ययानां प्रायः समुच्चयः कृतः। यथा रुद्रः इत्ययं शब्दः लोके वेदे उभयत्र प्राप्यते। उणादिषु रोदेर्णिलुक्[2] इत्यनेन सूत्रेण साधितोऽयं शब्दः। तस्य उणादौ शास्त्रान्तरे च निर्वचनम् इत्थं कृतं स्वामिदयानन्दसरस्वतेः ऋग्वेदभाष्ये[3] 'रुतः सत्योपदेशकान् राति ददाति इति रुद्रः' इति।

सायणाचार्येण अथर्वभाष्ये[4] उक्तं तथा वायवीयसंहितायां च लभ्यते यत् -

**रुद् दुःखं दुःखहेतुर्वा तद् द्रावयति नः प्रभुः।**

**रुद्र इत्युच्यते तस्मात् शिवः परमकारणम्॥** इति

रुद्रो रौतीति सतः इति यास्कः। रोरूयमाणो द्रवतीति वा[5]। यदरुरद् तद् रुद्रस्य रुद्रत्वम् इति काठके। यदरोदीत् तद् रुद्रस्य रुद्रत्वमिति हारिद्रविकम्। ते यदास्मान्मर्त्याच्छरीरादुत्क्रामन्ति अथ रोदयन्ति। तद् यद् रोदयन्ति तस्मात् रुद्राः इति शतपथे[6]। एवं रुद्रः इति शब्दस्य निर्वचने सर्वत्र धातुजत्वपक्षः एव आश्रितः दृश्यते। रोदेर्णिलुक् इति उणादिसूत्रमपि इममेव पक्षं रक्षति।

पञ्चपाद्युणादिपाठवृत्तिकारेषु अन्यतमेन महर्षिणा स्वामिदयानन्द-सरस्वतिना उणादयः अव्युत्पन्नानि प्रातिपदिकानि इत्येतन्मत-मनङ्गीकृत्य प्रत्येकमपि औणादिकः शब्दः मूलतः एव शुद्धः यौगिकः अस्तीति प्रतिपाद्य तस्य योगरूढत्वमपि अङ्गीकृतमस्ति। तदनु च प्रत्येकं शब्दस्य यौगिकार्थः योगरूढार्थश्च प्रदत्तः वर्तते। यथा - करोतीति कर्ता कारुः शिल्पी वा। कृधातोः उण्-प्रत्यययोजनेन निष्पन्नः कारुः इति शब्दः तस्य यौगिकार्थः कर्ता, रूढार्थश्च शिल्पी इति। इत्येवम्प्रकारेण छान्दसां शब्दानामपि निर्वचनं कृतं दृश्यते।

'व्याकरणे शकटस्य च तोकम्' इत्यनेन ज्ञायते यत् नैरुक्तानामपि अयमेव सिद्धान्तः यत् समस्तनामानि धातुजानि इति। किन्तु गार्ग्यादिकतिपयाचार्याः तथा न मन्वते। गार्ग्यादीनामस्यैव सिद्धान्तस्योत्तरं यत् यास्काचार्येण प्रदत्तं तेन ज्ञायते यत् उणादिषु निरुक्ते च साम्यं वर्तते इति। इत्थं निरुक्तकारस्य वैयाकरणेषु शाकटायनस्य च मतं यत् सर्वे सञ्ज्ञाशब्दाः अर्थात् रूढशब्दाः प्रकृतिप्रत्ययार्थसम्बन्धेन यौगिकाः तथा योगरूढतया अर्थबोधकाः भवन्ति। युधिष्ठिरमीमांसकेनापि पक्षमिमं प्रतिपादयता तस्य उणादिकोशे विवृतं यत् सर्वे गत्यर्थाः ज्ञानार्थाः। प्राचीनमतानुसारं च वाति इत्यस्य जानाति इत्यर्थोऽपि निर्दिष्टः वर्तते। तदनु सर्वज्ञः भगवान् परमेश्वरः अपि वायुपदेन गृह्यते। यथा यजुर्वेदे -

**तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।**

**तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः॥**

उणादीनां छान्दसां शब्दानां यौगिकत्वं प्रतिपादयन्त्यः काश्चन युक्तयः

- उणादौ प्रकृतिप्रत्ययौ स्पष्टतया निर्दिश्येते। यथा - ऋ गतौ। अचः इः[7] इति सूत्रेण धातुजत्वसिद्धान्तस्य पुष्टिं कुर्वतोः निरुक्ते उणादौ च शब्दव्युत्पत्तिविषये बहुत्र साम्यं दृश्यते। यथा पात्रं पानात्[8]। पा पाने धातोः दादिभ्यश्छन्दसि[9] इत्यनेन ष्ट्रन् प्रत्ययः।
- नैरुक्तानां सिद्धान्तोऽयं यत् शब्दानां प्रथमप्रवृत्तिः काञ्चित् क्रियामाधृत्यैव भवति पश्चाच्च गुणादियोगात् तत्क्रियारहितार्थेष्वपि भवति। यथा - पद्यते गम्यते अनेन इत्येवं पादः इति पदं निष्पन्नम् । पश्चात्पशूनां पादानां चतुर्थांशत्वात् चतुर्थांशः, पद्यस्य पङ्क्तिरेका इत्यनयोरर्थयोरपि शब्दः अयं प्रयुज्यमानः दृश्यते। एवं नैरुक्ताः अर्थगतप्रधानक्रियाद्वारा तद्वाचकधातुं कल्पयित्वा निर्वचनं कुर्वन्ति। 'अर्थनित्यं परीक्षेत न संस्कारमाद्रियेत' इति प्रतिजानानाः नैरुक्ताः व्याकरणप्रोक्तसंस्कारान् नानुकुर्वन्ति। अर्थप्राधान्यं मन्वानाः नैरुक्ताः भाषाप्रवाहे वर्णविकाराः लोपाश्च नैसर्गिकाः इति विश्वसन्ति। अस्यैव सिद्धान्तस्य पुष्टिरूपा भवति स्वामिदयानन्दसरस्वतेः उणादिवृत्तिः।
- पाणिनिना केचन शब्दाः अनिर्वचनीयाः मताः। किन्तु सर्वाणि नामानि धातुजानि इति यास्कसिद्धान्तम् अङ्गीकृत्य उणादयो बहुलमिति सूत्रं रचितमिति अभिप्रेतुमवकाशः विद्यते। लौकिकशब्दानामिव वैदिकशब्दानां व्युत्पत्तावपि उणादीनामत्यन्तं

महत्त्वपूर्णा भूमिका वर्तते। तन्निदर्शकानि कानिचन सूत्राणि -

**1) छन्दसीणः**[10] – वेदविषये एव इण् गतौ धातोः उण् प्रत्ययः भवति। एति प्राप्नोति सर्वम् इति आयुः, जीवनकालः।

**2) बहुलमन्यत्रापि सञ्ज्ञाच्छन्दसोः**[11] – सञ्ज्ञायां छन्दोविषये च रक् प्रत्ययः भवति। सूत्रेणानेन पाशधरः, शूलधरः, चक्रधरः, वज्रधरः, शक्तिधरः, उदकधरः, दण्डधरः इत्येते शब्दाः सिध्यन्ति। अत्र सर्वत्र अचि प्रत्यये धृ-धातोः परस्य णेः लुक् भवति। बहुलवचनाच्च सञ्ज्ञाच्छन्दसोः अपि णेर्लुक् भवति। यथा - पर्णानि शोषयति, मोचयति, रोहयति वा स पर्णशुट्, पर्णमुक्, पर्णरुट् इति।

**3) जोरी च**[12] – जुधातोः रक्-प्रत्ययः इकारादेशश्च। जीवति प्राणान् धारयतीति जीरदानुः। वैदिकं रूपमेतत्।

**4) भूसूधूभ्रस्जिभ्यश्छन्दसि**[13] – सूत्रगतेभ्यः धातुभ्यः वेदविषये क्युन्-प्रत्ययः स्यात्। भुवनम्, सुवनः, धुवनः, भृज्जनम्। भुवनशब्दस्तु बहुलवचनात् भाषायामपि प्रयुज्यते।

**5) छन्दस्यसानच् शुजॄभ्याम्**[14] – छन्दोविषये सूत्रगतधातुभ्याम् असानच्-प्रत्ययः भवति। शवन्ति गच्छन्ति अस्मिन् सः शवसानः। जीर्यति वयसा हीनः भवति इति जरसानः। बाहुलकाच्च दरसानः, तरसानः वरसानः इत्येते अपि। केषुचित् उणादिपाठेषु अमानच् इति प्रत्ययः । तेन शवमान इत्यादिरूपाण्यपि सिध्यन्ति।

**6) आङि शुषेः सनश्छन्दसि**[15] – आङ् इत्युपपदे सन्-प्रत्ययान्तात् शुष्- धातोः अनि प्रत्ययः। आ समन्तात् शुष्यन्ति पदार्थाः येन सः आशुशुक्षणिः।

**7) मनेर्धश्छन्दसि**[16] – छन्दसि विषये मन्-धातोः उसिप्रत्ययः धातोश्च ध इत्यन्तादेशः। मन्यते बुध्यते यद् येन वा मधुः।

**8) स्तुवः केय्यश्छन्दसि**[17] – स्तुधातोः केय्यप्रत्ययः स्यात् वेदविषये। स्तूयते असौ स्तुवेय्यः (पुरन्दरः)। क्सेय्यः इति पाठान्तरम्। तदा स्तुषेय्यः इति सिध्यति।

**9) वृतेश्छन्दसि**[18] – छन्दसि विषये वृत्-धातोः इ-प्रत्ययः स्यात्। वर्तते तत्र येन वा स वर्तिः, योगक्रिया, साधनद्रव्यं मार्गः वा।

**10) अशिशकिभ्यां छन्दसि**[19] – अश-शक् इत्येताभ्यां धातुभ्यां छन्दसि विषये मनिन् प्रत्ययः भवति। अश्नाति, अश्नुते व्याप्नोति वा स अश्मा, मेघः पाषाणो वा। शक्नोति इति शक्मा , सूर्यः।

**11) दादिभ्यश्छन्दसि**[20] – वेदविषये दाऽऽदिभ्यः धातुभ्यः त्रन् प्रत्ययः भवति। दात्रम्, पात्रम्, क्षेत्रम्, लोत्रम्, पोत्रम्।

**12) वहिहादाञ्भ्यश्छन्दसि**[21] – सूत्रगतधातुभ्यः छन्दसि विषये असुन् प्रत्ययः स्यात्। वहति भारमिति वक्षाः अनड्वान् वा। हीयते हीनो भवतीति हासाः चन्द्रमाः वा। दधाति इति धासाः पर्वतः वा।

एवंरीत्या नैरुक्तानां शाकटायनादीनां च धातुजत्वसिद्धान्तस्य रक्षां करोति उणादिपाठः। अपि च न केवलं लौकिकानाम् अपि तु वैदिकानामपि शब्दानां प्रकृतिप्रययविभागपुरस्सरं निर्वचनं कृतमस्ति उणादिना। इत्थं वेदानामङ्गं व्याकरणं व्याकरणस्याङ्गं च उणादिः। उणादिकोशोऽपि शब्दसाधुत्वं द्योतयन् भाषां भाषाशास्त्रं च प्रभावयन् वेदस्य भाषाविषयकानुसन्धाने नूतनशब्दाविष्कृतौ च सहकरिष्यति।

**सन्दर्भग्रन्थसूची**

1.संस्कृतव्याकरणशास्त्र का इतिहास (द्वितीयः भागः) पं युधिष्ठिर-मीमांसकः, रामलाल कपूर ट्रस्ट, 2000

2.उणादिकोशः, सोमलेखा, ईश्वरचन्द्रः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2008

3.उणादिकोषः, स्वामिदयानन्दसरस्वतिः, सम्पादकः युधिष्ठिर-मीमांसकः, श्रीमती सावित्रीदेवी बागडिया धर्मार्थ ट्रस्ट, कलकत्ता, अप्रैल 2010

4.विभिन्नाः पञ्चपाद्युणादिपाठवृत्तयः

**सन्दर्भ ग्रन्थ: -**

1 गीता - 15.15
2 उणादि.सू.सं - 2.22
3 ऋ.भा - 1.114.3
4 अ.भा - 2.27.6
5 निरुक्ते - 10.5
6 श.ब्रा - 14.6.9.5
7 उ.सू.सं - 4.140
8 निरुक्ते - 5.2
9 उ.सू.सं - 4.171
10 उ.सू.सं - 1.2
11 उ.सू.सं – 2.23
12 उ.सू.सं – 2.24
13 उ.सू.सं -2.81
14 उ.सू.सं – 2.87
15 उ.सू.सं – 2.105
16 उ.सू.सं – 2.118
17 उ.सू.सं – 3.99
18 उ.सू.सं – 4.142
19 उ.सू.सं – 4.148
20 उ.सू.सं – 4.171
21 उ.सू.सं – 4.222